# पंडितप्रवर आशाधरः ।

( हिन्दीभाषात संस्कृतेऽनुवाद कारित )

अयं श्रीविद्वच्छिरोमणि॰ व्याघ्रेरवाल-( बघेरवाल ) जातिदिशा निजतेजसा भूषयाचक्रे, अतएवास्य **आशाधरेति** सार्थक नामास्ति । तस्य पितुर्नाम **सलखणो** मातुश्च **श्रीरत्नी** इति प्रथितम् । जन्म चास्य माण्डलगढे यदस्मिन समये मेवाडराज्येऽन्तर्गतः, व्याघ्रिलोचनेन्दुमित १२३० विक्रमसंवत्सरे निकटवर्तिनि कस्मिंश्चित्समये बभूव । एकोनपञ्चाशदधिकद्वादशशत- ( १२४९ ) विक्रमाब्दे गजनीपट्टनस्थशहाबुद्दीनगौरीनामकेन तुरुष्कराजेन पृथ्वीराजनृपेन्द्र निजबन्धने कृत्वा इन्द्रप्रस्थ ( दिल्ली ) स्वकीयराजधानी स्थापिता । तदैव च तेन अजमेराख्यप्रान्ते आक्रमित । यवनाना महदत्याचारेभ्य. धर्मनाशभयेन तत्क्षणे पंडितवरस्य पूज्यपितर. सकुटुब मालवीयराजधान्या धारापुरी न्यवसन् । तदा तत्र परमारवंशीयस्य प्रतापिनो विन्ध्यवर्मनृपस्य राज्यमासीत । एष विन्ध्यनरेन्द्रविजयवर्मेत्याख्याप्यासीपि प्रथित॰ ।

आशाधरस्य पिता सलखण ( मल्लक्षण ) भुवि बहुसमानित इत्यनुमीयते । अर्जुनवर्मदेवमहाराजस्य द्वासप्तत्यधिकद्वादशशतपरिमित ( १२७२ ) विक्रमाब्दीयमेक दानपत्रमुपलब्धमस्ति यदमरेश्वरतीर्थे समर्पितम् । तदन्ते च " महासान्धिविग्रहिकराजा सलखणसमतेन राजगुरुणा मदनेन" इति लिखितमस्ति । अनेन ज्ञायते यत् आशाधरस्य पिता सलखणाख्य अर्जुनवर्मदेव नृपस्य साधिविग्रहिकमंत्री ( फोरेन सेक्रेटरी ) बभूव त च राजपदवी उपश्वाऽऽसीत् ।

अर्जुनवर्मा विन्ध्यवर्मणः पौत्र सुभटवर्मणस्तनूज आसीत् । अस्य राज्यसमयो विक्रमीयपञ्चषष्ट्यधिकद्वादशशताब्दत एकद्विवर्ष पूर्व पश्चाद्वाऽस्ति इति कल्प्यते ।

आशाधरस्य रमणी सरस्वतीति नाम्ना प्रख्याता । तस्याःकुक्षितः छाहडाख्य. सूनुरभवत् यस्य प्रशसा तैरेव स्वयकृता लिखित चास्ति यत् महाराजार्जुनदेवा अपि तद्गुणेऽनुरक्ता आसन् ।

टीका—भावयेद्भूयो भूयो मनसि प्रणिदध्यात्। कोऽसौ, निश्चेलस्त्यक्तस-मस्तवस्त्रादिपरिग्रह। किं तन्महाव्रतं। किं कृत्वा, आरोप्य निर्यापकाचार्य-वचनेनात्मनि स्थापयित्वा। कया, भक्त्या पञ्चतय्या हिंसादिविरत्या, पञ्च-तय्या समित्या, त्रितय्या च गुप्त्या, व्रतसमितिगुप्तिभिस्त्रयोदशप्रकारं चारि-त्रमात्मनि व्यवस्थाप्य। किं कृत्वा, समर्प्य आयत्तं कृत्वा। कं, स्वमात्मानं। कस्मिन्, निर्यापके संसाराब्धिर्यान्तं क्षपकं प्रयोजयतीति निर्यापकः षट्त्रिंश-द्गुणोपेतो धर्माचार्यस्तस्मिन्। कया, भक्त्या शुभवृत्त्या। भक्त्येत्यस्य सन्द-शकन्यायेनोभयत्र सबन्धः। अन्यस्तु सचेलः पुनस्तन्महाव्रतं भावयेत्। किंविशिष्टमनारोपितमेव सग्रन्थस्य तदारोपणेऽनधिकारात्॥ ४४॥

अतिचारपञ्चकपरिहारेण सल्लेखनाविधिना संस्तरस्थस्य प्रवृत्तिमुपदिशति—

**जीवितमरणाशंसे सुहृदनुरागं सुखानुबन्धमजन्।**
**स निदानं संस्तरगश्चरेच्च सल्लेखनाविधिना॥ ४५॥**

टीका—न केवलमारोपितमनारोपितं वा महाव्रतं संस्तरगो भावयेच्चरेच्च चेष्टेत। केन, सल्लेखनाविधिना जन्ममृत्युजरातङ्का इत्यादिना प्रबन्धेन प्राग्-क्तेन। किं कुर्वन्, अजन् क्षिपन् निराकुर्वन्नित्यर्थः। के, जीवितमरणाशंसे जीविताकांक्षा मरणाकांक्षा च। तथा सुहृदनुरागं मित्रानुरागं। तथा सुखा-नुबन्धं। किंविशिष्टं, सनिदानं निदानेन सह। पञ्चमं निदानमप्यजन्नित्यर्थः। इतो विशेषेणैषामर्थः प्रकाश्यते। तत्र जीविताशंसा शरीरमिदमवश्यहेयं जलबुद्बुदवदनित्यमित्यादिकमस्मरतोऽस्यावस्थानं कथं स्यादित्यादरः। पूजा-विशेषदर्शनात्प्रभूतपरिचारावलोकनात्सर्वलोकश्लाघाश्रवणाच्चैव हि मन्यते प्रत्याख्यातचतुर्विधाहारस्यापि मे जीवितमेव श्रेयः। यत एवंविधा मदुद्देशे-नेयं विभूतिर्वर्तते इत्याकांक्षेति यावत्। मरणाशंसा रोगोपद्रवाकुलतया प्राप्तजीवनसंक्लेशस्य मरणं प्रति चित्तप्रणिधानं। यदा न कश्चित्प्रतिपत्त्यादानं प्रति सपर्यया आद्रियते, न च कश्चित् श्लाघते, तदा तस्य यदि शीघ्रं म्रियेय तदा भद्रकं स्यादित्येवंविधपरिणामोत्पत्तिर्वा। सुहृदनुरागो बाल्ये सहपां-सुक्रीडनादि व्यसने सहायत्वमुत्सवे सम्भ्रम इत्येवमादेश्च मित्रसुकृतस्यानु-स्मरणं। बाल्याद्यवस्थासहक्रीडितमित्रानुस्मरणं वा। सुखानुबन्धः एवं मया भुक्तमेवं शयितमेवं क्रीडितमित्येवमादि प्रीतिविशेषं प्रति स्मृतिसमन्वाहारः।

जिनागमनिर्यासभूतं निबधर्मचरे [illegible] नदीपि[illegible]
णीय धर्मामृत धर्मामृताख्य न्यद[illegible] म ॥ [illegible] ॥

आयुर्वेदविदा[illegible]

अ[illegible] य[illegible] ॥ १२ ॥

व्यक्त प्र[illegible] [illegible]पहृदयनाम्नी ॥ १२ ॥

[illegible]पदेशादिषु नि[illegible] ।

[illegible]कोशे च क्रियाक[illegible] ॥ १३ ॥

आदि आराधनासारभूपालचतुर्विंश[illegible] । उज्जनौ उत्कृष्ट कृतवान् ॥ १३ ॥

रौद्रटस्य व्यधात्काव्यालङ्कारस्य निबन्धनम् ।

सहस्रनामस्तवनं सनिबन्धं च योऽर्हताम् ॥ १४ ॥

रौद्रटस्य रुद्रटाचार्यकृतस्य । अर्हतां अनंतजिनानां ॥ १४ ॥

सनिबन्धं [illegible] जिनयज्ञकल्पमरीरचत् ।

[illegible] यो निबंधालंकृतं व्य[illegible] ॥ १५ ॥

[illegible]स्वयंकृतेन जिनयज्ञकल्पदीपकाख्येनानिबन्धेन सहितं

जि[illegible] [illegible]शास्त्र अरीरचत् नि[illegible]

आर्षमहापु[illegible]वृत्तिपश्चिर[illegible]

सशास्त्र । नि[illegible] स्वयं[illegible] जौहरी

अर्ह[illegible] जीवन्दास जौहरी

चक्रे [illegible]मीचन्द चौकसी

५१) [illegible]मागमलजी प्रभुदयालजी

५१) पदमचन्दजी भूरामल

५१) डाह्याभाई प्रेमचन्द जवेरी

१) देवजी रायसी

[illegible] दोसी जयचन्द [illegible]चन्द पूनावाला

[illegible]वनमरवाला

प्रमारवंशवार्धीन्दुदेवपालनृपात्मजे ।
श्रीमज्जैतुगिदेवऽसिस्थेम्ना [illegible] मवत्यलम् ॥ १९ ॥

असिस्थेम्ना खड्गजलेन अवति रक्षति सति [illegible]

नलकच्छपुरे श्रीमन्नेमिचैत्यालयेऽ[illegible]
टीकेयं भव्यकुमुदचन्द्रिकेत्युदिता बुधैः ॥ २० ॥

असिधत् सिद्धा ॥ २० ॥

षण्णवद्येकसंख्यानविक्रमाङ्कसमात्यये ।
सप्तम्यामसिते पौषे सिद्धेयं नन्दताच्चिरम् ॥ २१ ॥

सम सवत्सरा १२९६ वर्षे पौष सप्तमीदिन शुक्रदिने इत्यथ ॥ २१ ॥

श्रीमान् श्रेष्ठिसमुद्धरस्य तनयः श्रीपौरपाटान्वय-
व्योमेन्दुः सुकृतेन नन्दतु महिचन्द्रोयदभ्यर्थनात् ।
[illegible] श्रावकधर्मदीपकमिमं ग्रन्थं बुधाशाधरो
[illegible] च [illegible]तोऽपि विदधे येनादिमः पुस्तकः ॥ २२ ॥

१५) [illegible]
१५) रिख[illegible] ॥ २२ ॥
१५) उगरचन्द राय[illegible] [illegible]तेश्छिन्दानमन्[illegible]
१५) मास्टर मगनलाल [illegible] [illegible]सा द[illegible]
११) *उत्तमचन्द रिखबच[illegible] [illegible]
११) त्रिभुवनदास रणछोडदा[illegible]
११) चिरजीलाल मथुरावाला
११) अमीचन्द दलीचन्द सीवक[illegible]
११) अमृतलाल गुलाबचन्द पर[illegible]ला
११) *कस्तूरचन्द छावडा इन्दोर[illegible]
११) घासीराम लखमीचन्द, सनाव[illegible]
११) कालीदास अमरसी, सेर द[illegible]

